# ॥ સંન્યાસિ ગીતિકા ॥

.. Song of the Sannyasin ..

sanskritdocuments.org

August 20, 2017

# .. Song of the Sannyasin ..

# ॥ સંન્યાસિ ગીતિકા ॥

## Sanskrit Document Information

Text title : sanyAsigItikA

File name : sanyAsigItikA.itx

Category : vedanta, misc, sahitya, advice, vivekAnanda

Location : doc_z_misc_general

Author : Engilsh poem Song of the Sannyasin by Swami Vivekananda, Sanskrit translation by svAmI nityAnanda bhAratI shAstrI vedAchArya uttarakAshI

Language : Sanskrit

Subject : hinduism/Vedanta

Transliterated by : sunderh at hotmail.com

Proofread by : sunderh at hotmail.com, Swami Mahayogananda, Shankara

Translated by : http://www.ramakrishnavivekananda.info/vivekananda/volume_4/writings_poems/the_son

Description-comments : meter - Shardulavikridita

Latest update : November 28, 2011

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ સંન્યાસિ ગીતિકા ॥

ગીતં ગાય સુતુઙ્ગતાનસહિતં દૂરાત્સુદૂરોત્થિતં
સંસારોદ્ભવદોષલેશરહિતશ્વેતાદ્રિગર્ભોદ્ભવમ્ ।
ઉત્પન્નં ચ વનસ્થલેઽતિગહને,–તદ્ધ્યેવ દોધ્વન્યતાં
સન્યાસિન્ ! ભવ વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ॐ તત્ સત્ ॐ ।

શાન્તિર્યસ્ય કદાપિ વૈ ધનયશઃકામૈર્ન સંભિદ્યતે
યસ્મિંશ્ચાપિ સુમુક્તિદા પ્રવહતિ જ્ઞાનસ્ય ગઙ્ગા સદા ।
સત્યાનન્દવિધારિણી ભગવતી,–તત્રોત્થિતં ગીયતાં
સન્યાસિન્ ! ભવ વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ॐ તત્ સત્ ॐ । ૧

પાશાંશ્છિન્ધિ તતઃ સ્વકાંશ્ચ સતતં યે ત્વાં નિબધ્નન્તિ વૈ
સૌવર્ણાંશ્ચ તથા ચમત્કૃતિમતો લોહાદિયુક્તાંશ્ચ વા ।
રાગદ્વેષશુભાશુભં ચ , –સકલા દ્વન્દ્વાવલી દૂયતાં
સન્યાસિન્ ! ભવ વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ॐ તત્ સત્ ॐ ।

સંશ્લિષ્ટોઽથ ચ દણ્ડિતોઽપિ કશયા દાસસ્તુ દાસો હિ સઃ
સૌવર્ણસ્ય વિઘટ્ટિતો યદિ ભવેત્ પાશસ્તુ પાશો યતઃ ।
બન્ધાયૈવ સમર્થિતઃ,–પરમતઃ પાશશ્ચ વિચ્છિદ્યતાં
સન્યાસિન્ ! ભવ વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ॐ તત્ સત્ ॐ । ૨

દૂરં ગચ્છતુ મોહજાલજટિલં તામિસ્રભૂતન્તમઃ
યેનૈતદ્ધિ સુબુદ્ધિવિભ્રમકરૈઃ સંવર્ધ્યતેઽન્ધન્તમઃ ।
એવં મોહમયી હિ જીવનતૃષા–સા સર્વથા શમ્યતાં
સન્યાસિન્ ! ભવ વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ॐ તત્ સત્ ॐ ।

ઉત્પત્તેશ્ચ મૃતિં મૃતેશ્ચ જનનં જીવોઽનયાકૃષ્યતે
સ્વાત્મા યેન જિતઃ સખે શૃણુ જગત્તેનૈવ સઞ્જીયતે ।
વિદ્ધ્યેવં ચ સદૈવ મોક્ષણવિધૌ ધૃત્યા વ્યવસ્થીયતાં

સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।   ૩

" વપ્તા ભુઙ્ક્ષ્યતિ નિશ્ચિતં ફલમતઃ, કાર્યં ચ વૈ કારણાત્
ભદ્રાદ્ભદ્રમથાશુભાદશુભમપ્યેતદ્વ્યવસ્થાપિતમ્ ।
શક્તઃ કોઽપિ ન લઙ્ઘિતું કથમપિ" ત્વેવં ત્વયા બુદ્ધ્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।

"યસ્ત્વાકારમવાપ્સ્યતિ ધ્રુવમિદં બદ્ધો ભવિષ્યત્યસૌ"
એતત્સત્યમથાપિ ભો ! શૃણુ, સદા મુક્તઃ સદાત્મા યતઃ ।
નામાકારવિવર્જિતોઽસ્તિ ચ–તતઃ તત્ ત્વં હિ નિશ્ચીયતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।   ૪

તે જાનન્તિ ન સત્યમેવ નિતરાં યે સ્વપ્નસઙ્કલ્પિતાન્
પશ્યન્ત્યેવ યથા–પિતા ચ જનની પુત્રાશ્ચ પત્ની સખા ।
આત્મા લિઙ્ગવિવર્જિતઃ શૃણુ સખે ! વ્યર્થં ન વૈ કલ્પ્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।

આત્મા કસ્ય પિતા ? તથા કથય ભો !–કસ્યાસ્તિ પુત્રશ્ચ સઃ ?
બન્ધુઃ કસ્ય ? તથા રિપુશ્ચ વદ યસ્ત્વેકો હિ નિર્લિઙ્ગકઃ ?
અન્યો નાસ્તિ તતશ્ચ સર્વમયતઃ,–તત્ ત્વં હિ નિશ્ચીયતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।   ૫

એકસ્તિષ્ઠતિ નિત્યમુક્તવિભવઃ જ્ઞાતા સદાત્મા, મુને !
નામાકારવિકારકલ્પનકલાલેશો ન તસ્મિન્ મુને !
સાક્ષાત્તત્ત્વમસીતિ વિદ્ધિ સતતં જ્ઞાને ચ નિષ્ઠીયતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।

તં ચાશ્રિત્ય તનોતિ મોહઘટિતાન્ સ્વપ્નાન્ હિ માયા બહૂન્
સાક્ષી દૃશ્યતયા વિભાતિ ચ તથા જીવસ્વરૂપસ્તદા ।

સાક્ષાત્તત્ત્વમસીતિ વિદ્ધિ સતતં જ્ઞાને ચ નિષ્ઠીયતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

—ૐ તત્ સત્ ૐ ।   ૬

કુત્રાન્વિષ્યસિ મુક્તિતાં ? પ્રિયસખે ! નાયં હિ લોકસ્તુ તે
લોકોઽન્યોઽપિ ન દત્સ્યતે કથમપિ, ગ્રન્થેષુ વૈ મન્દિરે ।
વ્યર્થશ્ચાસ્તિ પરિશ્રમોઽત્ર ભવતા સ્વાભ્યન્તરેઽન્વિષ્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

—ૐ તત્ સત્ ૐ ।

યેન ત્વં પરિપીડિતોઽસિ નિતરાં, હસ્તે ત્વદીયે હિ તત્
હસ્તેનૈવ હિ ધાર્યતે ચ સકલં ત્વત્પાશજાલં મહત્ ।
તસ્માચ્છોકવિલાપનં ત્યજ સખે ! —પાશશ્ચ ભો ! મુચ્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

—ૐ તત્ સત્ ૐ ।   ૭

સર્વેભ્યોઽસ્તુ શિવં તથા ન ચ ભવેન્મત્તો ભયં પ્રાણિનાં,
સ્વર્ગે યસ્તુ વિરાજતે, ક્ષિતિતલે નીચૈશ્ચ સર્પન્તિ યે ।
સર્વેષામહમસ્મિ જીવનધરાત્મેતિ,—ત્વયા કથ્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

—ૐ તત્ સત્ ૐ ।

આમુષ્મિક્યમથૈહિકં ચ સકલં ભોગં ત્યજામિ સ્વકં
સ્વર્ગં, ભૌમમથો તથા ચ નરકં, સર્વં પ્રતીક્ષાભયમ્ ।
સન્યસ્તં હિ મયેતિ ભો ! કથય, ચ ત્વદ્બન્ધનં કર્ત્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

—ૐ તત્ સત્ ૐ ।   ૮

તસ્માન્નૈવ વિચિન્ત્યતાં નિજવપુસ્તિષ્ઠત્વથો યાતુ વા
કાર્યં તેન સુસાધિતં , ત્વમધુના દૈવાર્પણં તત્ કૃથાઃ ।
પુષ્પૈરર્ચતુ, પાદમાક્ષિપતુ વા કિઞ્ચિન્ન વૈ કથ્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

—ૐ તત્ સત્ ૐ ।

પૂજા તત્ર વિગર્હણં કથમપિ સ્થાતું ન વૈ શક્નુતઃ

સ્તુત્યસ્તાવકનિન્દ્યનિન્દકગણાઃ યત્રૈક્યભાવં ગતાઃ ।
ઇત્થં શાન્તમના ભવાન્ ભવતુ ચ દ્વૈતં ન વૈ દૃશ્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।   ૯

સત્યં તત્ર ન ભાસતે, યદિ ભવેત્ કામો, યશો, લાલસા
યાં કાઞ્ચિત્પરિપશ્યતિ સ્ત્રિયમથો પત્નીત્વભાવેન યઃ ।
મોક્ષસ્તસ્ય ન શક્યતે કથમપિ,–સ્વાન્તસ્તતઃ શુધ્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।

સ્વલ્પં ચાપિ પરિગ્રહન્તુ કુરુતે, ક્રોધેન યો બધ્યતે ।
માયાદ્વારવિપાટનં નહિ સખે ! દુષ્ટૈર્હિ સમ્ભાવ્યતે ।
તસ્માન્મોક્ષવિભાવનાય સતતં કામાદિકં ત્યજ્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।   ૧૦

મિત્ર ! ત્વં હ્યનિકેતનો ભવ સદા–કિં તદ્ગૃહં યચ્ચ ભો !
ત્વામાચ્છદાયિતું પ્રભુર્ભવતિ ? તુ સ્વાચ્છાદનં તે નભઃ ।
શય્યા તે ભુવિ સુન્દરી તૃણમયી–તત્ર ત્વયા શ્રામ્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।

દૈવાલ્લબ્ધમવાપ્ય ભોજનમથાપક્વં સુસિદ્ધં તથા
કિઞ્ચિન્નૈવ વિચિન્ત્યતાં, પ્રિયસખે ! હ્યન્નાચ્ચ પાન્નાચ્ચ વા ।
આત્મજ્ઞો ન હિ લિપ્યતેઽત્ર ભવતા ગઙ્ગાવદાચર્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।   ૧૧

સત્યં વેત્તિ હિ કશ્ચિદેવ વિબુધઃ, શેષસ્તુ વિદ્વિક્ષ્યતે !
ત્વાં ચૈવોપહસિષ્યતિ હ્યથ ખલસ્ત્વં ચોત્તમો વર્તસે ।
હાસ્યદ્વેષમતસ્ત્વયા હિ સુમહન્ !–કિઞ્ચિન્ન વૈ વીક્ષ્યતાં
સન્યાસિન્ ! ભવ  વીરભાવભરિતઃ સૂદ્ગીથ ઉદ્ઘોષ્યતામ્ ॥

–ૐ તત્ સત્ ૐ ।

स्वातन्त्र्येण च गम्यतां प्रियसखे ! देशाच्च देशं तथा,
मायामोहसमावृतांश्च कुरु भो ! मोहान्धकाराद्बहिः ।
त्यक्त्वा कष्टभयं तथा सुखचयं-द्वन्द्वात्परं स्थीयतां
सन्यासिन् ! भव  वीरभावभरितः सूद्गीथ उद्घोष्यताम् ॥

–ॐ तत् सत् ॐ ।   १२

इत्थं चैव दिनाद्दिनं भवति चेत् यावद्धि कर्मक्षयः
आत्मा मोक्षमवाप्स्यति, ह्यथ पुनर्भावो न वर्तिष्यते ।
तस्मान्मृत्युमुखात् प्रमुच्य, भवता–स्वात्मन्यवस्थीयतां
सन्यासिन् ! भव  वीरभावभरितः सूद्गीथ उद्घोष्यताम् ॥

–ॐ तत् सत् ॐ ।

तत्रास्मन्न च युष्मदस्ति च कुतो जीवेशभावभ्रमः
सर्वं मय्यहमेव विश्वमखिलं, चानन्दरूपोऽस्म्यहम् ।
नित्यानन्दमयश्च, भो ! त्वमसि तत् ब्रह्मेति निश्चीयतां
सन्यासिन् ! भव  वीरभावभरितः सूद्गीथ उद्घोष्यताम् ॥

–ॐ तत् सत् ॐ ।   १३

Encoded by Sunder Hattangadi sunderh at hotmail.com,
Proofread by Sunder Hattangadi, Swami Mahayogananda, Shankara

Song of the Sannyasin by Swami Vivekananda
Sanskrit translation by shrImat svAmI nityAnanda bhAratI shAstrI
vedAchArya uttarakAshI
meter - Shardulavikridita

The English meaning is available at
http://www.ramakrishnavivekananda.info/vivekananda/volume_4/writings_poems/the_s

Also see Marathi, Hindi, Bangla translation links at
https://maasarada.blogspot.com/2015/06/uthaao-sanyaasi-uthao-se-taan-himaadritml
There is one another sanyAsagItI in Marathi available in audio on this site.

.. Song of the Sannyasin ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*